# Brahmakritam 14 Vishnu Stotram

# બ્રહ્મકૃતં ૧૪ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 14 Vishnu Stotram

File name : brahmakRRitaM14viShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 8/34-49||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 13, 2025

*sanskritdocuments.org*

Brahmakritam 14 Vishnu Stotram

# બ્રહ્મકૃતં ૧૪ વિષ્ણુસ્તોત્રમ્

પૂર્વં નષ્ટાં સ્મૃતિં લબ્ધ્વા બ્રહ્મા તુષ્ટાવ કેશવમ્ ॥ ૩૪॥

નમઃ સૃષ્ટિસ્વરૂપાય નમો વૈરાજમૂર્તયે ।
નમોઽવાન્તરસર્ગાય નમો બ્રહ્માદિરૂપિણે ॥ ૩૫॥

નમો હિરણ્યગર્ભાય મહાવિષ્ણુસ્વરૂપિણે ।
નમઃ પ્રધાનપતયે પ્રકૃતિસ્વામિને નમઃ ॥ ૨૬॥

નમો ભૂમ્નેઽનિરુદ્ધાય પ્રદ્યુમ્નાય ચ તે નમઃ ।
નમઃ સઙ્કર્ષણાખ્યાય વાસુદેવાય તે નમઃ ॥ ૨૭॥

નમો મહાપૂરુષાય મહાકાલાય તે નમઃ ।
નમોઽક્ષરનિવાસાય મુક્તાન્તર્યામિણે નમઃ ॥ ૩૦॥

વ્યાપકાય પરેશાય નૈકરૂપાય તે નમઃ ।
સતિ ત્વયિ વિપર્યાસો વિવર્તઃ પરિણામકઃ ॥ ૨૯॥

જગતોઽસ્ય ભવેન્નૂનં તદભિન્નાય તે નમઃ ।
સાક્ષિણે સર્વનેત્રાય સ્વરાજે ચ નમો નમઃ ॥ ૮.૪૦॥

નાનાશ્ચર્યનિવાસાય નાનારૂપધરાય ચ ।
ભિન્નાત્મદર્શિને પૂર્વં પશ્ચાદેકાત્મદર્શિને ॥ ૪૧॥

અન્વિતાનન્વિતાર્થાય નમઃ સદસદાત્મને ।
પરમાણુસ્વરૂપાય વ્યાપકાય ચ તે નમઃ ॥ ૪૨॥

ત્રિધાચ્છેદવિહીનાય સ્ત્રીપુંરૂપાત્મને નમઃ ।
નમો જ્ઞાનાય દિવ્યાય જ્ઞેયાય જ્ઞાતૃરૂપિણે ॥ ૪૩॥

નમો માનસ્વરૂપાય માનાય મિતયે નમઃ ।
પ્રમાત્રે ચ નમસ્તેઽસ્તુ સત્કાર્યાય ચ તે નમઃ ॥ ૪૪॥

ફલવ્યાપ્તિસ્વરૂપાય શ્રુતિવાદાય તે નમઃ ।

વાગ્વિશ્રાન્તિસ્વરૂપાય નમો જ્ઞપ્તિલયાત્મને ॥ ૪૫॥

પ્રકાશાકાશતનવે દિવ્યાદિવ્યગુણાત્મને ।
સર્વં યસ્માદ્યત્ર સર્વં યશ્ચ સર્વાત્મકઃ પ્રભુઃ ॥ ૪૬॥

સ્વપ્નાસ્વપ્નોભયાર્થાય શાસ્ત્રે તેઽસ્તુ નમો નમઃ ।
ત્વયા કૃપાલુના દેવ હૃત્કપાટં પ્રવોધિતમ્ ॥ ૪૭॥

યદર્થં તત્કરિષ્યેઽહં તત્ર મા વિસ્મર પ્રભો ।
ત્વત્પ્રદત્તપ્રબોધેન કરિષ્યે સર્ગઘટ્ટનામ્ ॥ ૪૮॥

તત્ર મે બન્ધનં મા સ્યાત્સાહાય્યં પ્રાર્થયે તવ ।
સર્વકાર્યસમુત્પાદે ક્લૃપ્તિદર્શકરો ભવ ॥ ૪૯॥

ઇતિ સ્તુત્વા સ્વયં બ્રહ્મા તૂષ્ણીમાસ ક્ષણાન્તરે ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતસન્તાનખણ્ડે અષ્ટમાધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૮/૩૪-૪૯॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 8/34-49..

Proofread by PSA Easwaran

*Brahmakritam 14 Vishnu Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*